# shrIkRRiShNAShTottarashatanAmastotram

# શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : kRRiShNAShTottarashatanAmastotram 2 from brahmANDapurANa

File name : kRRiShNAShTottarashatanAmastotrambrahmANDa.itx

Category : aShTottarashatanAma, vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran, Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : 108 names stotra is also seen in Naradapancharatra.

Source : Brahmandapurana Adhyaya 36, Naradapancharatra

Latest update : February 11, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 22, 2022

*sanskritdocuments.org*

# શ્રીકૃષ્ણાષ્ટોત્તરશતનામસ્તોત્રમ્

અગસ્ત્ય ઉવાચ
સ્તોત્રં તત્તે પ્રવક્ષ્યામિ યસ્યાર્થં ત્વમિહાગતઃ ।
વારાહાદ્યવતારાણાં ચરિતં પાપનાશનમ્ ॥ ૨.૩૬.૧૧॥

સુખદં મોક્ષદં ચૈવ જ્ઞાનવિજ્ઞાનકારણમ્ ।
શ્રુત્વા સર્વં ધરા વત્સ પ્રહૃષ્ટા તં ધરાધરમ્ ॥ ૨.૩૬.૧૨॥

ઉવાચ પ્રણતા ભૂયો જ્ઞાતું કૃષ્ણવિચેષ્ટિતમ્ ।
ધરણ્યુવાચ
અલઙ્કૃતં જન્મ પુંસામપિ નન્દવ્રજૌકસામ્ ॥ ૨.૩૬.૧૩॥

તસ્ય દેવસ્ય કૃષ્ણસ્ય લીલાવિગ્રહધારિણઃ ।
જયોપાધિનિયુક્તાનિ સન્તિ નામાન્યનેકશઃ ॥ ૨.૩૬.૧૪॥

તેષુ નામાનિ મુખ્યાનિ શ્રોતુકામા ચિરાદહમ્ ।
તત્તાનિ બ્રૂહિ નામાનિ વાસુદેવસ્ય વાસુકે ॥ ૨.૩૬.૧૫॥

નાતઃ પરતરં પુણ્યં ત્રિષુ લોકેષુ વિદ્યતે ।
શેષ ઉવાચ
વસુન્ધરે વરારોહે જનાનામસ્તિ મુક્તિદમ્ ॥ ૨.૩૬.૧૬॥

સર્વમઙ્ગલમૂર્દ્ધન્યમણિમાદ્યષ્ટસિદ્ધિદમ્ ।
મહાપાતકકોટિઘ્નં સર્વતીર્થફલપ્રદમ્ ॥ ૨.૩૬.૧૭॥

સમસ્તજપયજ્ઞાનાં ફલદં પાપનાશનમ્ ।
શૃણુ દેવિ પ્રવક્ષ્યામિ નામ્નામષ્ટોત્તરં શતમ્ ॥ ૨.૩૬.૧૮॥

સહસ્રનામ્નાં પુણ્યાનાં ત્રિરાવૃત્ત્યા તુ યત્ફલમ્ ।
એકાવૃત્ત્યા તુ કૃષ્ણસ્ય નામૈકં તત્પ્રયચ્છતિ ॥ ૨.૩૬.૧૯॥

તસ્માત્પુણ્યતરં ચૈતત્સ્તોત્રં પાતકનાશનમ્ ।

નામ્નામષ્ટોત્તરશતસ્યાહમેવ ઋષિઃ પ્રિયે ॥ ૨.૩૬.૨૦॥

છન્દોઽનુષ્ટુબ્દેવતા તુ યોગઃ કૃષ્ણપ્રિયાવહઃ ।

શ્રીકૃષ્ણઃ કમલાનાથો વાસુદેવઃ સનાતનઃ ॥ ૨.૩૬.૨૧॥

વસુદેવાત્મજઃ પુણ્યો લીલામાનુષવિગ્રહઃ ।
શ્રીવત્સકૌસ્તુભધરો યશોદાવત્સલો હરિઃ ॥ ૨.૩૬.૨૨॥

ચતુર્ભુજાત્તચક્રાસિગદાશઙ્ખાદ્યુદાયુધઃ ।
દેવકીનન્દનઃ શ્રીશો નન્દગોપપ્રિયાત્મજઃ ॥ ૨.૩૬.૨૩॥

યમુનાવેગસંહારી બલભદ્રપ્રિયાનુજઃ ।
પૂતનાજીવિતહરઃ શકટાસુરભઞ્જનઃ ॥ ૨.૩૬.૨૪॥

નન્દવ્રજજનાનન્દી સચ્ચિદાનન્દવિગ્રહઃ ।
નવનીતવિલિપ્તાઙ્ગો નવનીતનટોઽનઘઃ ॥ ૨.૩૬.૨૫॥

નવનીતલવાહારી મુચુકુન્દપ્રસાદકૃત્ ।
ષોડશસ્ત્રીસહસ્રેશસ્ત્રિભઙ્ગી મધુરાકૃતિઃ ॥ ૨.૩૬.૨૬॥

શુકવાગમૃતાબ્ધીન્દુર્ગોવિન્દો ગોવિદામ્પતિઃ ।
વત્સપાલનસઞ્ચારી ધેનુકાસુરમર્દ્દનઃ ॥ ૨.૩૬.૨૭॥

તૃણીકૃતતૃણાવર્ત્તો યમલાર્જુનભઞ્જનઃ ।
ઉત્તાલતાલભેત્તા ચ તમાલશ્યામલા કૃતિઃ ॥ ૨.૩૬.૨૮॥

ગોપગોપીશ્વરો યોગી સૂર્યકોટિસમપ્રભઃ ।
ઇલાપતિઃ પરઞ્જ્યોતિર્યાદવેન્દ્રો યદૂદ્વહઃ ॥ ૨.૩૬.૨૯॥

વનમાલી પીતવાસાઃ પારિજાતાપહરકઃ ।
ગોવર્દ્ધનાચલોદ્ધર્ત્તા ગોપાલઃ સર્વપાલકઃ ॥ ૨.૩૬.૩૦॥

અજો નિરઞ્જનઃ કામજનકઃ કઞ્જલોચનઃ ।
મધુહા મથુરાનાથો દ્વારકાનાથકો બલી ॥ ૨.૩૬.૩૧॥

વૃન્દાવનાન્તસઞ્ચારી તુલસીદામભૂષણઃ ।
સ્યમન્તકમણેર્હર્ત્તા નરનારાયણાત્મકઃ ॥ ૨.૩૬.૩૨॥

કુબ્જાકૃષ્ટામ્બરધરો માયી પરમપૂરુષઃ ।
મુષ્ટિકાસુરચાણૂરમલ્લયુદ્ધવિશારદઃ ॥ ૨.૩૬.૩૩॥

સંસારવૈરી કંસારિર્મુરારિર્નિરકાન્તકઃ ।
અનાદિર્બ્રહ્મચારી ચ કૃષ્ણાવ્યસનકર્ષકઃ ॥ ૨.૩૬.૩૪॥

શિશુપાલશિરસ્છેત્તા દુર્યોધનકુલાન્તકૃત્ ।
વિદુરાક્રૂરવરદો વિશ્વરૂપપ્રદર્શકઃ ॥ ૨.૩૬.૩૫॥

સત્યવાક્સત્યસંકલ્પઃ સત્યભામારતો જયી ।
સુભદ્રાપૂર્વજો વિષ્ણુર્ભીષ્મમુક્તિપ્રદાયકઃ ॥ ૨.૩૬.૩૬॥

જગદ્ગુરુર્જગન્નાથો વેણુવાદ્યવિશારદઃ ।
વૃષભાસુરવિધ્વંસી બકારિર્બાણબાહુકૃત્ ॥ ૨.૩૬.૩૭॥

યુધિષ્ટિરપ્રતિષ્ઠાતા બર્હિબર્હાવતંસકઃ ।
પાર્થસારથિરવ્યક્તો ગીતામૃતમહોદધિઃ ॥ ૨.૩૬.૩૮॥

કાલીયફણિમાણિક્યરઞ્જિતઃ શ્રીપદાંબુજઃ ।
દામોદરો યજ્ઞભોક્તા દાનવેદ્રવિનાશનઃ ॥ ૨.૩૬.૩૯॥

નારાયણઃ પરં બ્રહ્મ પન્નગાશનવાહનઃ ।
જલક્રીડાસમાસક્તગોપીવસ્ત્રાપહારકઃ ॥ ૨.૩૬.૪૦॥

પુણ્યશ્લોકસ્તીર્થપાદો વેદવેદ્યો દયાનિધિઃ ।
સર્વતીર્થાન્મકઃ સર્વગ્રહરૂપી પરાત્પરઃ ॥ ૨.૩૬.૪૧॥

ઇત્યેવં કૃષ્ણદેવસ્ય નામ્નામષ્ટોત્તરં શતમ્ ।
કૃષ્ણોન કૃષ્ણભક્તેન શ્રુત્વા ગીતામૃતં પુરા ॥ ૨.૩૬.૪૨॥

સ્તોત્રં કૃષ્ણપ્રિયકરં કૃતં તસ્માન્મયા શ્રુતમ્ ।
કૃષ્ણપ્રેમામૃતં નામ પરમાનન્દદાયકમ્ ॥ ૨.૩૬.૪૩॥

અત્યુપદ્રવદુઃખઘ્નં પરમાયુષ્યવર્ધનમ્ ।
દાનં વ્રતં તપસ્તીર્થં યત્કૃતં ત્વિહ જન્મનિ ॥ ૨.૩૬.૪૪॥

પઠતાં શ઼ૃણ્વતાં ચૈવ કોટિકોટિગુણં ભવેત્ ।
પુત્રપ્રદમપુત્રાણામગતીનાં ગતિપ્રદમ્ ॥ ૨.૩૬.૪૫॥

ધનાવહં દરિદ્રાણાં જયેચ્છૂનાં જયાવહમ્ ।
શિશૂનાં ગોકુલાનાં ચ પુષ્ટિદં પુણ્યવર્દ્ધનમ્ ॥ ૨.૩૬.૪૬॥

બાલરોગગ્રહાદીનાં શમનં શાન્તિકારકમ્ ।
અન્તે કૃષ્ણસ્મરણદં ભવતાપત્રયાપહમ્ ॥ ૨.૩૬.૪૭॥

અસિદ્ધસાધકં ભદ્રે જપાદિકરમાત્મનામ્ ।
કૃષ્ણાય યાદવેન્દ્રાય જ્ઞાનમુદ્રાય યોગિને ॥ ૨.૩૬.૪૮॥

નાથાય રુક્મિણીશાય નમો વેદાન્તવેદિને ।
ઇમં મન્ત્રં મહાદેવિ જપન્નેવ દિવા નિશમ્ ॥ ૨.૩૬.૪૯॥

સર્વગ્રહાનુગ્રહભાક્સર્વપ્રિયતમો ભવેત્ ।
પુત્રપૌત્રૈઃ પરિવૃતઃ સર્વસિદ્ધિસમૃદ્ધિમાન્ ॥ ૨.૩૬.૫૦॥

નિષેવ્ય ભોગાનન્તેઽપિ કૃષ્ણાસાયુજ્યમાપ્નુયાત્ ।
verses 21 through 50 also appear in NaradapancharAtra

અગસ્ત્ય ઉવાચ
એતાવદુક્તો ભાગવાનનન્તો મૂર્ત્તિસ્તુ સંકર્ષણસંજ્ઞિતા વિભો ॥ ૨.૩૬.૫૧॥

ધરાધરોઽલં જગતાં ધરાયૈ નિર્દિશ્ય ભૂયો વિરરામ માનદઃ ।
તતસ્તુ સર્વે સનકાદયો યે સમાસ્થિતાસ્તત્પરિતઃ કથાદૃતાઃ ।
આનન્દપૂર્ણામ્બુનિધૌ નિમગ્નાઃ સભાજયામાસુરહીશ્વરં તમ્ ॥ ૨.૩૬.૫૨॥

ઋષય ઊચુઃ
નમો નમસ્તેઽખિલવિશ્વાભાવન પ્રપન્નભક્તાર્ત્તિહરાવ્યયાત્મન્ ।
ધરાધરાયાપિ કૃપાર્ણવાય શેષાય વિશ્વપ્રભવે નમસ્તે ॥ ૨.૩૬.૫૩॥

કૃષ્ણામૃતં નઃ પરિપાયિતં વિભો વિધૂતપાપા ભવતા કૃતા વયમ્ ।
ભવાદૃશા દીનદયાલવો વિભો સમુદ્ધરન્ત્યેવ નિજાન્હિ સંનતાન્ ॥ ૨.૩૬.૫૪॥

એવં નમસ્કૃત્ય ફણીશપાદયોર્મનો વિધાયાખિલકામપૂરયોઃ ।
પ્રદક્ષિણીકૃત્ય ધરાધરાધરં સર્વે વયં સ્વાવસથાનુપાગતાઃ ॥ ૨.૩૬.૫૫॥

ઇતિ તેઽભિહિતં રામ સ્તોત્રં પ્રેમામૃતાભિધમ્ ।
કૃષ્ણસ્ય રાધાકાન્તસ્ય સિદ્ધિદમ્ ॥ ૨.૩૬.૫૬॥ incomplete metrically
ઇદં રામ મહાભાગ સ્તોત્રં પરમદુર્લભમ્ ।
શ્રુતં સાક્ષાદ્ભગવતઃ શેષાત્કથયતઃ કથાઃ ॥ ૨.૩૬.૫૭॥

યાવન્તિ મન્ત્રજાલાનિ સ્તોત્રાણિ કવચાનિ ચ ॥ ૨.૩૬.૫૮॥

ત્રૈલોક્યે તાનિ સર્વાણિ સિદ્ધ્યન્ત્યેવાસ્ય શીલનાત્ ।
વસિષ્ઠ ઉવાચ

એવમુક્ત્વા મહારાજ કૃષ્ણપ્રેમામૃતં સ્તવમ્ ।
યાવદ્વ્યરંસીત્સ મુનિસ્તાવત્સ્વર્યાનમાગતમ્ ॥ ૨.૩૬.૫૯॥

ચતુર્ભિરદ્ભુતૈઃ સિદ્ધૈઃ કામરૂપૈર્મનોજવૈઃ ।
અનુયાતમથોત્પ્લુત્ય સ્ત્રીપુંસૌ હરિણૌ તદા ।
અગસ્ત્યચરણૌ નત્વા સમારુરુહતુર્મુદા ॥ ૨.૩૬.૬૦॥

દિવ્યદેહધરૌ ભૂત્વા શઙ્ખચક્રાદિચિહ્નિતૌ ।
ગતૌ ચ વૈષ્ણવં લોકં સર્વદેવનમસ્કૃતમ્ ।
પશ્યતાં સર્વભૂતાનાં ભાર્ગવાગસ્ત્યયોસ્તથા ॥ ૨.૩૬.૬૧॥

ઇતિ શ્રીબ્રહ્માણ્ડે મહાપુરાણે વાયુપ્રોક્તે મધ્યભાગે તૃતીય
ઉપોદ્ધાતપાદે ભાર્ગવચરિતે ષટ્ત્રિંશત્તમોઽધ્યાયઃ ॥ ૩૬॥

Proofread by PSA Easwaran
The stotra part appears in Naradapancharatra as well that was
separately encoded and proofread by
Ravin Bhalekar ravibhalekar at hotmail.com

---

*shrIkRRiShNAShTottarashatanAmastotram*
pdf was typeset on October 22, 2022

Please send corrections to *sanskrit@cheerful.com*